# Surya Stotram 5

# સૂર્યસ્તોત્રમ્ ૫

## Document Information

Text title : Surya Stotram 5

File name : sUryastotram5.itx

Category : navagraha

Location : doc_z_misc_navagraha

Proofread by : Pallasena Narayanaswami ppnswami at gmail.com

Description-comments : Brihatstotraratnakara. mahAbhArata | vanaparva | adhyAya 3/36-70 ||

Latest update : February 20, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 24, 2024

*sanskritdocuments.org*

# Surya Stotram 5

# સૂર્યસ્તોત્રમ્ ૫

શ્રીગણેશાય નમઃ ।
ત્વં ભાનો જગતશ્ચક્ષુસ્ત્વમાત્મા સર્વદેહિનામ્ ।
ત્વં યોનિઃ સર્વભૂતાનાં ત્વમાચારઃ ક્રિયાવતામ્ ॥ ૧॥

ત્વં ગતિઃ સર્વસાઙ્ખ્યાનાં યોગિનાં ત્વં પરાયણમ્ ।
અનાવૃતાર્ગલદ્વારં ત્વં ગતિસ્ત્વં મુમુક્ષતામ્ ॥ ૨॥

ત્વયા સન્ધાર્યતે લોકસ્ત્વયા લોકઃ પ્રકાશ્યતે ।
ત્વયા પવિત્રીક્રિયતે નિર્વ્યાજં પાલ્યતે ત્વયા ॥ ૩॥

ત્વામુપસ્થાય કાલે તુ બ્રાહ્મણા વેદપારગાઃ ।
સ્વશાખાવિહિતૈર્મન્ત્રૈરર્ચત્યૃષિગણાર્ચિત ॥ ૪॥

તવ દિવ્યં રથં યાન્તમનુયાન્તિ વરાર્થિનઃ ।
સિદ્ધચારણગધર્વા યક્ષગુહ્યકપન્નગાઃ ॥ ૫॥

ત્રયસ્ત્રિંશચ્ચ વૈ દેવાસ્તથા વૈમાનિકા ગણાઃ ।
સોપેન્દ્રાઃ સમહેન્દ્રાશ્ચ ત્વામિષ્ટ્વા સિદ્ધિમાગતાઃ ॥ ૬॥

ઉપયાન્ત્યર્ચયિત્વા તુ ત્વાં વૈ પ્રાપ્તમનોરથાઃ ।
દિવ્યમન્દારમાલાભિસ્તૂર્ણં વિદ્યાધરોત્તમાઃ ॥ ૭॥

ગુહ્યાઃ પિતૃગણાઃ સપ્ત યે દિવ્યા યે ચ માનુષાઃ ।
તે પૂજયિત્વા ત્વામેવ ગચ્છન્ત્યાશુ પ્રધાનતામ્ ॥ ૮॥

વસવો મરુતો રુદ્રા યે ચ સાધ્યા મરીચિપાઃ ।
વાલખિલ્યાદયઃ સિદ્ધાઃ શ્રેષ્ઠત્વં પ્રાણિનાં ગતાઃ ॥ ૯॥

સબ્રહ્મકેષુ લોકેષુ સપ્તસ્વપ્યખિલેષુ ચ ।
ન તદ્ભૂતમહં મન્યે યદર્કાદતિરિચ્યતે ॥ ૧૦॥

સન્તિ ચાન્યાનિ સત્ત્વાનિ વીર્યવન્તિ મહાન્તિ ચ ।

ન તુ તેષાં તથા દીપ્તિઃ પ્રભવો વા યથા તવ ॥ ૧૧॥

જ્યોતીંષિ ત્વયિ સર્વાણિ ત્વં સર્વજ્યોતિષાં પતિઃ ।
ત્વયિ સત્યં ચ સત્ત્વં ચ સર્વે ભાવાશ્ચ સાત્ત્વિકાઃ ॥ ૧૨॥

ત્વત્તેજસા કૃતં ચક્રં સુનાભં વિશ્વકર્મણા ।
દેવારીણાં મદો યેન નાશિતઃ શાર્ઙ્ગધન્વના ॥ ૧૩॥

ત્વમાદાયાંશુભિસ્તેજો નિદાઘે સર્વદેહિનામ્ ।
સર્વૌષધિરસાનાં ચ પુનર્વર્ષાસુ મુઞ્ચસિ ॥ ૧૪॥

તપન્ત્યન્યે દહન્ત્યન્યે ગર્જન્ત્યન્યે યથા ઘનાઃ ।
વિદ્યોતન્તે પ્રવર્ષન્તિ તવ પ્રાવૃષિ રશ્મયઃ ॥ ૧૫॥

ન તથા સુખયત્યગ્નિર્ન પ્રાવારા ન કમ્બલાઃ ।
શીતવાતાર્દિતં લોકં યથા તવ મરીચયઃ ॥ ૧૬॥

ત્રયોદશદ્વીપવતીં ગોભિર્ભાસયસે મહીમ્ ।
ત્રયાણામપિ લોકાનાં હિતાયૈકઃ પ્રવર્તસે ॥ ૧૭॥

તવ યદ્યુદયો ન સ્યાદન્ધં જગદિદં ભવેત્ ।
ન ચ ધર્માર્થકામેષુ પ્રવર્તેરન્મનીષિણઃ ॥ ૧૮॥

આધાનપશુબન્ધેષ્ટિમન્ત્રયજ્ઞતપક્રિયાઃ ।
ત્વત્પ્રસાદાદવાપ્યન્તે બ્રહ્મક્ષત્રવિશાં ગણૈઃ ॥ ૧૯॥

યદહર્બ્રહ્મણઃ પ્રોક્તં સહસ્રયુગસમ્મિતમ્ ।
તસ્ય ત્વનાદિરન્તશ્ચ કાલજ્ઞૈઃ પરિકીર્તિતઃ ॥ ૨૦॥

મનૂનાં મનુપુત્રાણાં જગતોઽમાનવસ્ય ચ ।
મન્વન્તરાણાં સર્વેષામીશ્વરાણાં ત્વમીશ્વરઃ ॥ ૨૧॥

સંહારકાલે સમ્પ્રાપ્તે તવ ક્રોધવિનિઃસૃતઃ ।
સંવર્તકાગ્નિસ્ત્રૈલોક્યં ભસ્મીકૃત્યાવતિષ્ઠતે ॥ ૨૨॥

ત્વદ્દીધિતિસમુત્પન્ના નાનાવર્ણા મહાઘનાઃ ।
સૈરાવતાઃ સાશનયઃ કુર્વન્ત્યાભૂતસમ્પ્લવમ્ ॥ ૨૩॥

કૃત્વા દ્વાદશધાત્માનં દ્વાદશાદિત્યતાં ગતઃ ।
સંહૃત્યૈકાર્ણવં સર્વં ત્વં શોષયસિ રશ્મિભિઃ ॥ ૨૪॥

ત્વામિન્દ્રમાહુસ્ત્વં રુદ્રસ્ત્વં વિષ્ણુસ્ત્વં પ્રજાપતિઃ ।
ત્વમગ્નિસ્ત્વં મનઃ સૂક્ષ્મં પ્રભુસ્ત્વં બ્રહ્મ શાશ્વતમ્ ॥ ૨૫॥

ત્વં હંસઃ સવિતા ભાનુરંશુમાલી વૃષાકપિઃ ।
વિવસ્વાન્મિહિરઃ પૂષા મિત્રો ધર્મસ્તથૈવ ચ ॥ ૨૬॥

સહસ્રરશ્મિરાદિત્યસ્તપનસ્ત્વં ગવાં પતિઃ ।
માર્તણ્ડોઽર્કો રવિઃ સૂર્યઃ શરણ્યો દિનકૃત્તથા ॥ ૨૭॥

દિવાકરઃ સપ્તસપ્તિર્ધામકેશી વિરોચનઃ ।
આશુગામી તમોઘ્નશ્ચ હરિતાશ્વશ્ચ કીર્ત્યસે ॥ ૨૮॥

સપ્તમ્યામથવા ષષ્ટ્યાં ભક્ત્યા પૂજાં કરોતિ યઃ ।
અનિર્વિણ્ણોઽનહઙ્કારી તં લક્ષ્મીર્ભજતે નરમ્ ॥ ૨૯॥

ન તેષામાપદઃ સન્તિ નાધયો વ્યાધયસ્તથા ।
યે તવાનન્યમનસા કુર્વત્યર્ચનવન્દનમ્ ॥ ૩૦॥

સર્વરોગૈર્વિરહિતાઃ સર્વપાપવિવર્જિતાઃ ।
ત્વદ્ભાવભક્તાઃ સુખિનો ભવન્તિ ચિરજીવિનઃ ॥ ૩૧॥

ત્વં મમાપન્નકામસ્ય સર્વાતિથ્યં ચિકીર્ષતઃ ।
અન્નમન્નપતે દાતુમભિતઃ શ્રદ્ધયાર્હસિ ॥ ૩૨॥

યે ચ તેઽનુચરાઃ સર્વે પાદોપાન્તં સમાશ્રિતાઃ ।
માઠરારુણદણ્ડાદ્યાસ્તાંસ્તાન્વન્દેઽશનિક્ષુભાન્ ॥ ૩૩॥

ક્ષુભયા સહિતો મૈત્રી યાશ્ચાન્યા ભૂતમાતરઃ ।
તાશ્ચ સર્વા નમસ્યામિ પાન્તુ માં શરણાગતમ્ ॥ ૩૪॥

વૈશમ્પાયન ઉવાચ ।
એવં સ્તુતો મહારાજ ભાસ્કરો લોકભાવનઃ ।
તતો દિવાકરઃ પ્રીતો દર્શયામાસ પાણ્ડવમ્ ॥ ૩૫॥

દીપ્યમાનઃ સ્વવપુષા જ્વલન્નિવ હુતાશનઃ ।
વિવસ્વાનુવાચ ।
યત્તેઽભિલષિતં કિઞ્ચિત્તત્ત્વં સર્વમવાપ્સ્યસિ ॥ ૩૬॥

અહમન્નં પ્રદાસ્યામિ સપ્ત પઞ્ચ ચ તે સમાઃ ।
ગૃહ્ણીષ્વ પિઠરં તામ્રં મયા દત્તં નરાધિપ ॥ ૩૭॥

યાવદ્વર્ત્સ્યતિ પાઞ્ચાલી પાત્રેણાનેન સુવ્રત ।
ફલમૂલામિષં શાકં સંસ્કૃતં યન્મહાનસે ॥ ૩૮॥

ચતુર્વિધં તદન્નાદ્યમક્ષય્યં તે ભવિષ્યતિ ।
ઇતશ્ચતુર્દશે વર્ષે ભૂયો રાજ્યમવાપ્સ્યસિ ॥ ૩૯॥

વૈશમ્પાયન ઉવાચ ।
એવમુક્ત્વા તુ ભગવાંસ્તત્રૈવાન્તરધીયત ।
ઇમં સ્તવં પ્રયતમનાઃ સમાધિના પઠેદિહાન્યોઽપિ વરં સમર્થયન્ ॥ ૪૦॥

તત્તસ્ય દદ્યાચ્ચ રવિર્મનીષિતં તદાપ્નુયાદ્યદ્યપિ તત્સુદુર્લભમ્ ।
યશ્ચેદં ધારયેન્નિત્યં શ‍ૃણુયાદ્વાપ્યભીક્ષ્ણશઃ ॥ ૪૧॥

પુત્રાર્થી લભતે પુત્રં ધનાર્થી લભતે ધનમ્ ।
વિદ્યાર્થી લભતે વિદ્યા પુરુષોઽપ્યથવા સ્ત્રિયઃ ॥ ૪૨॥

ઉભે સન્ધ્યે જપેન્નિત્યં નારી વા પુરુષો યદિ ।
આપદં પ્રાપ્ય મુચ્યેત બદ્ધો મુચ્યેત બન્ધનાત્ ॥ ૪૩॥

ઇતિ શ્રીમહાભારતોક્તં યુધિષ્ઠિરવિરચિતં સૂર્યસ્તોત્રં સમ્પૂર્ણમ્ ॥

મહાભારત । વનપર્વ । અધ્યાય ૩/૩૬-૭૦ ॥

mahAbhArata . vanaparva . adhyAya 3/36-70 ..

Proofread by Pallasena Narayanaswami ppnswami at gmail.com

*Surya Stotram 5*

pdf was typeset on August 24, 2024

Please send corrections to *sanskrit@cheerful.com*